स योगी गवि भार्य्यायां विष्वक्सेनमधात् सुतम्॥” “गवि सरस्वत्यां भार्य्यायाम्॥” इति कश्चित् व्याचष्टे॥)

गौः, [ गो ] पुं, स्त्री, ( गम्यते ज्ञायते स्पर्शसुखमनेन। गम्+“गमेर्डोः।” उणां। २। ६३। इति करणे डोः। त्वचि जातत्वादेवास्य तथात्वम्। ) लोम। ( गच्छति निम्नदेशमिति। कर्त्तरि डोः। निम्नप्रवणादेवास्य तथात्वम्। ) जलम्। इत्यमरटीकायां भानुदीक्षितः॥

गौञ्जिकः, पुं, ( गुञ्जा परिमाणविशेषस्तद्ग्रहीतुं शीलमस्य। यद्वा, गुञ्जा गुञ्जाफलं तस्य परिमाणार्थं ग्रहणं विद्यते अस्य। गुञ्जा+ठक्। ) स्वर्णकारः। इति त्रिकाण्डशेषः॥

गौडः, पुं, स्वनामख्यातदेशः। ( यथा, प्रबोधचन्द्रोदये। २। ७।
“गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी।
भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः पिता॥”)
तद्देशस्थे पुं भूम्नि। इति जटाधरः॥ तद्देशसीमा यथा, शक्तिसङ्गमतन्त्रे सप्तमपटले।
“वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे!।
गौड़देशः समाख्यातः सर्व्वविद्याविशारदः॥”
( देशोऽयं हहत्संहितायां कूर्म्मविभागे पूर्व्वस्यामुक्तः। यथा, तत्रैव। १४। ५, ७।
“अथ पूर्व्वस्याम्।” इत्युक्त्वा
“उदयगिरि भद्रगौड़क-
पौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः॥”
इत्युक्तवान्॥)
पञ्च गौड़ा यथा, स्कन्दपुराणे।
“सारस्वताः कान्यकुब्जा गौड़मैथिलिकोत्कलाः।
पञ्च गौड़ा इति ख्याता विन्ध्यस्योत्तरवासिनः॥”
( गुड़स्य विकारः। गुड़+अण्। गुड़जाते आसवे क्ली च। अस्य गुणा यथा,—
“बद्धमूत्रशकृद्वातो गौड़स्तर्पण-दीपनः॥”
इति —स्थाने पञ्चमेऽध्याये वाभटेनोक्तम्॥
“श्यामादन्तीरसे गौड़ः पिप्पलीफलचित्रकैः।
सिद्धोऽनिल-कफ-प्लीहपाण्डूदरापहः॥”
इति च चरके कल्पस्थाने द्वादशेऽध्याये॥)

गौड़वास्तूकः, पुं, (गौडे गौड़देशे जातः गौड़देशवासिप्रियो वा वास्तूकः शाकविशेषः।) चिल्लीशाकम्। इति राजनिर्घण्टः॥ ( चिल्लीशब्देऽस्य विवृतिर्ज्ञेया॥)

गौड़िकं, क्ली, (गौडं गुड़विकारस्तत् कारणत्वेनास्त्यस्य। “अत इनिठनौ।” ५। २। ११५। इति ठन्।) मद्यविशेषः। यथा,“पैष्टिकगौड़िकमाध्वीकानां पानं सुरापाने कष्टतमम्॥” इति प्रायश्चित्तविवेके देवलः॥ गुड़निष्पन्नमद्ये त्रि॥ (पुं, गुड़े साधुः। “गुड़ादिभ्यष्ठञ्।” ४।४।१०३। इति ठञ्। इक्षुः। इति सिद्धान्तकौमुदी॥)

गौड़ी, स्त्री, ( गुड़स्य विकारः गुड़विकारेण सम्पादिता इत्यर्थः। गुड़+अण्। स्त्रियां ङीप्।) गुड़ादिकृता सुरा। गुड़ेर मद इति भाषा॥ ( यथा, मनुः। ११। ९४।
“गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा॥”)
तत्पर्य्यायः। वारुणी २। इति त्रिकाण्डशेषः॥ अस्या गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। मधुरत्वम्। वातनाशित्वम्। पित्तबलकान्तिदृष्टिकारित्वम्। दीपनत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ ( यथा च हारीते प्रथमे स्थाने ११ अध्याये।
“गौड़ी कषाया मधुराम्लशीता
सन्दीपनी शूलरुजापहन्त्री।
हृद्या त्रिदोषं शमयत्यजीर्णं
पाण्ड्वामयार्शःश्वसनं निहन्ति॥”)
रागिणीविशेषः। सा तु मेघरागस्य पत्नी। इति सङ्गीतदामोदरः॥ ( गौड़ानां गौड़देशवासिनां प्रिया।) काव्यरीतिविशेषः। यथा,—
“ओजःप्रसादमाधुर्य्यं गुणत्रितयभेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः॥”
इति काव्यचन्द्रिका॥
( यथा च साहित्यदर्पणे। ९। ४।
“ओजःप्रकाशकैर्वर्णैर्बन्ध आड़म्बरः पुनः।
समासबहुला गौड़ी——————॥”
उदाहरणं यथा, तत्रैव धृतो वेणीसंहारश्लोकः।
“चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
पुरुषोत्तमस्याह।
बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौड़ीया।
रीतिरनुप्रासमहिमपरतन्त्रास्तोभवाक्या च॥”)

गौणः, पुं, ( गुणादागता गौणी। तस्या आगतः प्रतिबोधितः। गौणी+अण्।) गौणीवृत्तिबोधितः। यथा,“शक्यस्य सादृश्यात्मकः सम्बन्धो गुणः तदधीना या लक्षणा सा गौणी तद्योगात् गौणः।” इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः॥ ( अमुख्ये त्रि। यथा, महाभारते। १२। ३४१। ९।
“बहूनि मम नामानि कीर्त्तितानि महर्षिभिः।
गौणानि तत्र नामानि कर्म्मजानि च कानिचित्॥”)

गौणकालः, पुं, ( गौणोऽमुख्यः कालः।) मुख्यकालकर्त्तव्यकर्म्मकरणयोग्यकालान्तरः। यथा,—
“यद्वागामिक्रियामुख्यकालस्याप्यन्तरालवत्।
गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्म्मणि॥
यद्वेति पक्षान्तरं प्राक्तनकार्य्ये मध्यकालवत् आगामिक्रियाया मुख्यकालस्यापि गौणकालत्वम्। तेन सायं सन्ध्याया रात्रिः प्रातः सन्ध्याकालश्च गौणकाल इत्यर्थः।” इति मलमासतत्त्वम्॥

गौणचान्द्रः, पुं, (गौणोऽप्रधानश्चान्द्रश्चन्द्रसम्बन्धिमासः।) कृष्णप्रतिपदादिपौर्णमास्यन्तमासः। यथा भट्टाचार्य्यधृतवचनं तिथ्यादितत्त्वे।
“गौणचान्द्रेण भाद्रता मुख्यचान्द्रेण श्रावणता॥”
अपि च शब्दरत्नावल्याम्।
“चान्द्रोऽपि द्विविधः प्रोक्तो मुख्यगौणविभेदतः।
गौणः कृष्णप्रतिपदादिपौर्णमास्यन्त ईरितः॥”

गौणी, स्त्री, ( गुणं सादृश्यमधिकृत्य प्रवृत्ता। गुण+अण+स्त्रियां ङीप्।) अशीतिप्रकारलक्षणान्तर्गतलक्षणाविशेषः। यथा,—
“सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।
सादृश्यात्तु मता गौण्यस्तेन षोड़श भेदिताः॥”
(“ताः पूर्व्वोक्ता अष्टादशभेदा लक्षणाः। सादृश्येतरसम्बन्धाः कार्य्यकारणभावादयः। अत्र शुद्धानां ‘श्वेतो धावति’ इत्यादीन्युदाहरणानि ज्ञेयानि। रूढ़ावुपादानलक्षणा सारोपा गौणी यथा ‘एतानि तैलानि हेमन्ते सुखानि’ अत्र तैलशब्दस्तिलभवस्नेहरूपं मुख्यार्थमुपादायैव सार्षपादिस्नेहेषु वर्त्तते। प्रयोजने यथा, राजकुमारेषु तत्सदृशेषु गच्छत्सु ‘एते राजकुमारा गच्छन्ति।’ रूढ़ावुपादानलक्षणा साध्यवसाना गौणी यथा, ‘तैलानि हेमन्ते सुखानि।’ प्रयोजने यथा, ‘राजकुमारा गच्छन्ति।’ रूढ़ौ लक्षणलक्षणा सारोपा गौणी यथा, ‘राजा गौड़ेन्द्रः कण्टकं शोधयति।’ प्रयोजने यथा, ‘गौर्वाहीकः।’ रूढ़ौ लक्षणा साध्यवसाना गौणी यथा, ‘राजा कण्टकं शोधयति।’ प्रयोजने यथा, ‘गौर्जल्पति।’

अत्र केचिदाहुः गोसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यन्ते। ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति। यदुक्तं, गोशब्दस्यागृहीतसङ्केतं वाहीकार्थमभिधातुमसामर्थ्यात् गोशब्दार्थमात्रबोधनाच्च। अभिधाया विरतत्वात् विरतायाश्च पुनरुत्थानाभावात्। अन्ये पुनर्गोशब्देन वाहीकार्थो नाभिधीयते किन्तु स्वार्थसहचारिगुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते। तदप्यन्ये न मन्यन्ते। तथाह्यत्र गोशब्दाद्वाहीकार्थः प्रतीयते न वा। आद्येऽपि गोशब्दादेव वा लक्षिताद्वा गुणात्। अविनाभावद्वारा तत्र न प्रथमः। वाहीकार्थेऽस्यासङ्केतितत्वात्। न द्वितीयः। अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासम्भवात्। शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्य्यते। न द्वितीयः। यदि हि गोशब्दाद्वाहीकार्थो न प्रतीयते तदास्य वाहीकस्य सामानाधिकरण्यमसमञ्जसं स्यात्। तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्म्यसम्बन्धाद्वाहीकार्थं लक्षयति। वाहीकस्याज्ञत्वाद्यातिशयबोधनं प्रयोजनम्। इयञ्च गुणयोगात् गौणी इत्युच्यते। पूर्व्वा तु उपचारामिश्रणात् शुद्धा। उपचारो हि नामात्यन्तं विप्रकीर्णयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्। यथा अग्निमाणवकयोः शुक्लपटयोस्तु नात्यन्तं भेदप्रतीतिः। तस्मादेवमादिषु शुद्धैव लक्षणा॥”